# shrIlakShmIlaharI

# શ્રીલક્ષ્મીલહરી

## Document Information

Text title : lakShmI laharI

File name : laxmiilaharii.itx

Category : laharI, devii, lakShmI, jagannAthapaNDita, devI

Location : doc_devii

Author : Jagannathapandita

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : July 20, 2004, June 17, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીલક્ષ્મીલહરી

શ્રીગણેશાય નમઃ ।
સમુન્મીલન્નીલામ્બુજનિકરનીરાજિતરુચામ્-
અપાઙ્ગાનાં ભઙ્ગૈરમૃતલહરીશ્રેણિમસૃણૈઃ ।
હ્રિયા હીનં દીનં ભૃશમુદરલીનં કરુણયા
હરિશ્યામા સા મામવતુ જડસામાજિકમપિ ॥ ૧॥

સમુન્મીલત્વન્તઃકરણકરુણોદ્ગારચતુરઃ
કરિપ્રાણત્રાણપ્રણયિનિ દૃગન્તસ્તવ મયિ ।
યમાસાદ્યોન્માદ્યદ્દ્વિપનિયુતગણ્ડસ્થલગલન્-
મદક્લિન્નદ્વારો ભવતિ સુખસારો નરપતિઃ ॥ ૨॥

ઉરસ્યસ્ય ભ્રશ્યત્કબરભરનિર્યત્સુમનસઃ
પતન્તિ સ્વર્બાલાઃ સ્મરશરપરાધીનમનસઃ ।
સુરાસ્તં ગાયન્તિ સ્ફુરિતતનુગઙ્ગાધરમુખાસ્-
તવાયં દૃક્પાતો યદુપરિ કૃપાતો વિલસતિ ॥ ૩॥

સમીપે સઙ્ગીતસ્વરમધુરભઙ્ગી મૃગદૃશાં
વિદૂરે દાનાન્ધદ્વિરદકલભોદ્દામનિનદઃ ।
બહિર્દ્વારિ તેષાં ભવતિ હયહેષાકલકલો
દૃગેષા તે યેષામુપરિ કમલે દેવિ સદયા ॥ ૪॥

અગણ્યૈરિન્દ્રાદ્યૈરપિ પરમપુણ્યૈઃ પરિચિતો
જગજ્જન્મસ્થાનપ્રલયરચનાશિલ્પનિપુણઃ ।
ઉદઞ્ચત્પીયૂષામ્બુધિલહરિલીલામનુહરન્-
નપાઙ્ગસ્તેઽમન્દં મમ કલુષવૃન્દં દલયતુ ॥ ૫॥

નમન્મૌલિશ્રેણિત્રિપુરપરિપન્થિપ્રતિલસત્-
કપર્દવ્યાવૃત્તિસ્ફુરિતફણિફૂત્કારચકિતઃ ।
લસત્ફુલ્લામ્ભોજમ્રદિમહરણઃ કોઽપિ ચરણશ્-

ચિરં ચેતશ્ચારી મમ ભવતુ વારીશદુહિતુઃ ॥ ૬॥

પ્રવાલાનાં દીક્ષાગુરુરપિ ચ લાક્ષારુણરુચાં
નિયન્ત્રી બન્ધૂકદ્યુતિનિકરબન્ધૂકૃતિપટુઃ ।
નૃણામન્તર્ધ્વાન્તં નિબિડમપહર્તું તવ કિલ
પ્રભાતશ્રીરેષા ચરણરુચિવેષા વિજયતે ॥ ૭॥

પ્રભાતપ્રોન્મીલત્કમલવનસઞ્ચારસમયે
શિખાઃ કિઞ્જલ્કાનાં વિદધતિ રુજં યત્ર મૃદુલાઃ ।
તદેતન્માતસ્તે ચરણમરુણશ્લાઘ્યકરુણં
કઠોરા મદ્વાણી કથમિયમિદાનીં પ્રવિશતુ ॥ ૮॥

સ્મિતજ્યોત્સ્નામજ્જદ્દ્વિજમણિમયૂખામૃતઝરૈર્-
નિષિઞ્ચન્તીં વિશ્વં તવ વિમલમૂર્તિં સ્મરતિ યઃ ।
અમન્દં સ્યન્દન્તે વદનકમલાદત્ય કૃતિનો
વિવિક્તૌ વૈ કલ્પાઃ સતતમવિકલ્પા નવગિરઃ ॥ ૯॥

શરૌ માયાબીજૌ હિમકરકલાક્રાન્તશિરસૌ
વિધાયોર્ધ્વં બિન્દું સ્ફુરિતમિતિ બીજં જલધિજે ।
જપેદ્યઃ સ્વચ્છન્દં સ હિ પુનરમન્દં ગજઘટામ્-
અદભ્રામ્યદ્ભૃઙ્ગૈર્મુખરયતિ વેશ્માનિ વિદુષામ્ ॥ ૧૦॥

સ્મરો નામં નામં ત્રિજગદભિરામં તવ પદં
પ્રપેદે સિદ્ધિં યાં કથમિવ નરસ્તાં કથયતુ ।
યયા પાતં પાતં પદકમલયોઃ પર્વતચરો
હરો હા રોષાર્દ્રામનુનયતિ શૈલેન્દ્રતનયામ્ ॥ ૧૧॥

હરન્તો નિઃશઙ્કં હિમકરકલાનાં રુચિરતાં
કિરન્તઃ સ્વચ્છન્દં કિરણમયપીયૂષનિકરમ્ ।
વિલુમ્પન્તુ પ્રૌઢા હરિહૃદયહારાઃ પ્રિયતમા
મમાન્તઃસન્તાપં તવ ચરણશોણામ્બુજનખાઃ ॥ ૧૨॥

મિષાન્માણિક્યાનાં વિગલિતનિમેષં નિમિષતામ્-
અમન્દં સૌન્દર્યં તવ ચરણયોરમ્બુધિસુતે ।
પદાલઙ્કારાણાં જયતિ કલનિક્વાણનપટુર્-
ઉદઞ્ચન્નુદ્દામઃ સ્તુતિવચનલીલાકલકલઃ ॥ ૧૩॥

મણિજ્યોત્સ્નાજાલૈર્નિજતનુરુચાં માંસલતયા
જટાલં તે જઙ્ઘાયુગલમઘભઙ્ગાય ભવતુ ।
ભ્રમન્તી યન્મધ્યે દરદલિતશોણામ્બુજરુચાં
દૃશાં માલા નીરાજનમિવ વિધત્તે મુરરિપોઃ ॥ ૧૪॥

હરદ્ગર્વં સર્વં કરિપતિકરાણાં મૃદુતયા
ભૃશં ભાભિર્દમ્ભં કનકમયરમ્ભાવનિરુહામ્ ।
લસજ્જાનુજ્યોત્સ્ના તરણિપરિણદ્ધં જલધિજે
તવોરુદ્વન્દ્વં નઃ શ્લથયતુ ભવોરુજ્વરભયમ્ ॥ ૧૫॥

કલક્વાણાં કાઞ્ચીં મણિગણજટાલામધિવહન્-
વસાનઃ કૌસુમ્ભં વસનમસનં કૌસ્તુભરુચામ્ ।
મુનિવ્રાતૈઃ પ્રાતઃ શુચિવચનજાતૈરતિનુતં
નિતમ્બસ્તે બિમ્બં હસતિ નવમમ્બામ્બરમણેઃ ॥ ૧૬॥

જગન્મિથ્યાભૂતં મમ નિગદતાં વેદવચસામ્-
અભિપ્રાયો નાદ્યાવધિ હૃદયમધ્યાવિશદયમ્ ।
ઇદાનીં વિશ્લેષાં જનકમુદરં તે વિમૃશતો
વિસન્દેહં ચેતોઽજનિ ગરુડકેતોઃ પ્રિયતમે ॥ ૧૭॥

અનલ્પૈર્વાદીન્દ્રૈરગણિતમહાયુક્તિનિવહૈર્-
નિરસ્તા વિસ્તારં ક્વચિદકલયન્તી તનુમપિ ।
અસત્ખ્યાતિવ્યાખ્યાધિકચતુરિમાખ્યાતમહિમા
વલગ્ને લગ્નેયં સુગતમતસિદ્ધાન્તસરણિઃ ॥ ૧૮॥

નિદાનં શૃઙ્ગારપ્રકરમકરન્દસ્ય કમલે
મહાનેવાલમ્બો હરિનયનરોલમ્બવરયોઃ ।
નિધાનં શોભાનાં નિધનમનુતાપસ્ય જગતો
જવેનાભીતિં મે દિશતુ તવ નાભીસરસિજમ્ ॥ ૧૯॥

ગભીરામુદ્વેલાં પ્રથમરસકલ્લોલમિલિતાં
વિગાઢું તે નાભીવિમલસરસીં ગૌર્મમ મનાક્ ।
પદં યાવન્નયસ્યત્યહહ વિનિમગ્નૈવ સહસા
નહિ ક્ષેમં સૂતે ગુરુમહિમભૂતેષ્વવિનયઃ ॥ ૨૦॥

કુચૌ તે દુગ્ધામ્ભોનિધિકુલશિખામણ્ડનમણે
હરેતે સૌભાગ્યં યદિ સુરગિરેશ્ચિત્રમિહ કિમ્ ।

ત્રિલોકીલાવણ્યાહરણનવલીલાનિપુણયોર્-
યયોર્દત્તે ભૂયઃ કરમખિલનાથો મધુરિપુઃ ॥ ૨૧॥

હરક્રોધત્રસ્યન્મદનનવદુર્ગદ્વયતુલાં
દધત્કોકદ્વન્દ્વદ્યુતિદમનદીક્ષાધિગુરુતામ્ ।
તવૈતદ્વક્ષોજદ્વિતયમરવિન્દાક્ષમહિલે
મમ સ્વાન્તધ્વાન્તં કિમપિ ચ નિતાન્તં ગમયતુ ॥ ૨૨॥

અનેકબ્રહ્માણ્ડસ્થિતિનિયમલીલાવિલસિતે
દયાપીયૂષામ્ભોનિધિસહજસંવાસભવને ।
વિધોશ્ચિત્તાયામે હૃદયકમલે તે તુ કમલે
મનાઙ્ગ મન્નિસ્તારસ્મૃતિરપિ ચ કોણે નિવસતુ ॥ ૨૩॥

મૃણાલીનાં લીલાઃ સહજલવણિમ્ના લઘયતાં
ચતુર્ણાં સૌભાગ્યં તવ જનનિ દોષ્ણાં વદતુ કઃ ।
લુઠન્તિ સ્વચ્છન્દં મરકતશિલામાંસલરુચઃ
શ્રુતીનાં સ્પર્ધાં યે દધત ઇવ કણ્ઠે મધુરિપોઃ ॥ ૨૪॥

અલભ્યં સૌરભ્યં કવિકુલનમસ્યા રુચિરતા
તથાપિ ત્વદ્ધસ્તે નિવસદરવિન્દં વિકસિતમ્ ।
કલાપે કાવ્યાનાં પ્રકૃતિકમનીયસ્તુતિવિધૌ
ગુણોત્કર્ષાધાનં પ્રથિતમુપમાનં સમજનિ ॥ ૨૫॥

અનલ્પં જલ્પન્તુ પ્રતિહતધિયઃ પલ્લવતુલાં
રસજ્ઞામજ્ઞાનાં ક ઇવ કમલે મંથરયતુ ।
ત્રપન્તુ શ્રીભિક્ષાવિતરણવશીભૂતજગતાં
કરાણાં સૌભાગ્યં તવ તુલયિતું તુઙ્ગરસનાઃ ॥ ૨૬॥

સમાહારઃ શ્રીણાં વિરચિતવિહારો હરિદૃશાં
પરીહારો ભક્તપ્રભવભવસન્તાપસરણેઃ ।
પ્રહારઃ સર્વાસામપિ ચ વિપદાં વિષ્ણુદયિતે
મમોદ્ધારોપાયં તવ સપદિ હારો વિમૃશતુ ॥ ૨૭॥

અલઙ્કુર્વાણાનાં મણિગણઘૃણીનાં લવણિમા
યદીયાભિર્ભાભિર્ભજતિ મહિમાનં લઘુરપિ ।
સુપર્વશ્રેણીનાં જનિતપરસૌભાગ્યવિભવાસ્-
તવાઙ્ગુલ્યસ્તા મે દદતુ હરિવામેઽભિલષિતમ્ ॥ ૨૮॥

તપસ્તેપે તીવ્રં કિમપિ પરિતપ્ય પ્રતિદિનં
તવ ગ્રીવાલક્ષ્મીલવપરિચયાદાપ્તવિભવમ્ ।
હરિઃ કમ્બું ચુમ્બત્યથ વહતિ પાણૌ કિમધિકં
વદામસ્તત્રાયં પ્રણયવશતોઽસ્યૈ સ્પૃહયતિ ॥ ૨૯॥

અભૂદપ્રત્યૂહઃ સકલહરિદુલ્લાસનવિધિર્-
વિલીનો લોકાનાં સ હિ નયનતાપોઽપિ કમલે ।
તવાસ્મિન્પીયૂષં કિરતિ વદને રમ્યવદને
કુતો હેતોશ્ચેતોવિધુરયમુદેતિ સ્મ જલધેઃ ॥ ૩૦॥

મુખામ્ભોજે મન્દસ્મિતમધુરકાન્ત્યા વિકસતાં
દ્વિજાનાં તે હીરાવલિવિહિતનીરાજનરુચામ્ ।
ઇયં જ્યોત્સ્ના કાપિ સ્રવદમૃતસંદોહસરસા
મમોદ્યદ્દારિદ્ર્યજ્વરતરુણતાપં તિરયતુ ॥ ૩૧॥

કુલૈઃ કસ્તૂરીણાં ભૃશમનિશમાશાસ્યમપિ
ચ પ્રભાતપ્રોન્મીલન્નલિનનિવહૈરશ્રુતચરમ્ ।
વહન્તઃ સૌરભ્યં મૃદુગતિવિલાસા મમ શિવં
તવ શ્વાસા નાસાપુટવિહિતવાસા વિદધતામ્ ॥ ૩૨॥

કપોલે તે દોલાયિતલલિતલોલાલકવૃતે
વિમુક્તા ધમ્મિલ્લાદભિલસતિ મુક્તાવલિરિયમ્ ।
સ્વકીયાનાં બન્દીકૃતમસહમાનૈરિવ બલાન્-
નિબધ્યોર્ધ્વં કૃષ્ટા તિમિરનિકુરમ્બૈર્વિધુકલા ॥ ૩૩॥

પ્રસાદો યસ્યાયં નમદમિતગીર્વાણમુકુટ-
પ્રસર્પજ્જ્યોત્સ્નાભિશ્ચરણતલપીઠાર્ચિતવિધિઃ ।
દૃગમ્ભોજં તત્તે ગતિહસિતમત્તેભગમને
વને લીનૈર્દીનૈઃ કથય કથમીયાદિહ તુલામ્ ॥ ૩૪॥

દુરાપા દુર્વૃત્તૈર્દુરિતદમને દારણભરા
દયાર્દ્રા દીનાનામુપરિ દલદિન્દીવરનિભા ।
દહન્તી દારિદ્ર્યદ્રુમકુલમુદારદ્રવિણદા
ત્વદીયા દૃષ્ટિર્મે જનનિ દુરદૃષ્ટં દલયતુ ॥ ૩૫॥

તવ શ્રોત્રે ફુલ્લોત્પલસકલસૌભાગ્યજયિની

સદૈવ શ્રીનારાયણગુણગણૌઘપ્રણયિની ।
રવૈર્દીનાં લીનામનિશમવધાનાતિશયિની
મમાપ્યેતાં વાચં જલધિતનયે ગોચરયતામ્ ॥ ૩૬॥

પ્રભાજાલૈઃ પ્રાભાતિકદિનકરાભાપનયનં
તવેદં ખેદં મે વિઘટયતુ તાટઙ્કયુગલમ્ ।
મહિમ્ના યસ્યાયં પ્રલયસમયેઽપિ ક્રતુભુજાં
જગત્પાયં પાયં સ્વપિતિ નિરપાયં તવ પતિઃ ॥ ૩૭॥

નિવાસો મુક્તાનાં નિબિડતરનીલામ્બુદનિભસ્-
તવાયં ધમ્મિલ્લો વિમલયતુ મલ્લોચનયુગમ્ ।
ભૃશં યસ્મિન્કાલાગરુબહુલસૌરભ્યનિવહૈઃ
પતન્તિ શ્રીભિક્ષાર્થિન ઇવ મદાન્ધા મધુલિહઃ ॥ ૩૮॥

વિલગ્નૌ તે પાર્શ્વદ્વયપરિસરે મત્તકરિણૌ
કરોન્નીતૈરઞ્ચન્મણિકલશમુગ્ધાસ્યગલિતૈઃ ।
નિષિઞ્ચન્તૌ મુક્તામણિગણજયૈસ્ત્વાં જલકણૈર્-
નમસ્યામો દામોદરગૃહિણી દારિદ્ર્યદલિતાઃ ॥ ૩૯॥

અયે માતર્લક્ષ્મિ ત્વદરુણપદામ્ભોજનિકટે
લુઠન્તં બાલં મામવિરલગલદ્બાષ્પજટિલમ્ ।
સુધાસેકસ્નિગ્ધૈરતિમસૃણમુગ્ધૈઃ કરતલૈઃ
સ્પૃશન્તી મા રોદીરિતિ વદ સમાશ્વાસ્યસિ કદા ॥ ૪૦॥

રમે પદ્મે લક્ષ્મિ પ્રણતજનકલ્પદ્રુમલતે
સુધામ્ભોધેઃ પુત્રિ ત્રિદશનિકરોપાસ્તચરણે ।
પરે નિત્યં માતર્ગુણમયિ પરબ્રહ્મમહિલે
જગન્નાથસ્યાકર્ણય મૃદુલવર્ણાવલિમિમામ્ ॥ ૪૧॥

॥ ઇતિ પણ્ડિતરાજશ્રીજગન્નાથવિરચિતા લક્ષ્મીલહરી સમાપ્તા ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrIlakShmIlaharI*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*